# श्रीरामायणतत्वदीपिका

## महेश्वरतीर्थीयम्

### १. अभ्यादानम्

श्रीमद्रामायणम् अस्य सर्वस्यापि जगतः, तदन्तर्गतस्य समस्य प्राणिवर्गस्य, भगवत्तत्वविजिज्ञासाभूमौ प्रविविक्षुजनस्य  च आभ्युदयकनैःश्रेयसप्रापकः सुलभः परमप्रमाणभूतो ग्रन्थराजः कवीनां परमाधारः प्रशास्ति समस्तिमिदं जगत्।

इदं शरणागतिशास्त्रम् अस्मिन् समग्रे जगतीतले अपगतातिशयसदृक्षं,परमप्रेमिकानां प्रेमानुभवास्पदं, सद्भिराद्रियमाणं, नित्यपारायणयोग्यग्रन्थेषु मथितक्षीराब्धिपीयूषं, अकुतोभयम् अधिजिगमिषूणां परमानुकूलं, अत्यन्तं सुलभया सरलगीर्वाण्या महर्षिणा कविकुलभूषणभूषिणा अनुकम्पिना आदिकविना साक्षात्कृत्य प्राकाश्यं नीतं, समुपगतसमाससन्धिसमाक्षरपदव्युत्पत्तिसममधुरोपनतमनोरमोदारवृत्तललितनवरससरसालङ्कारपदार्थ दृष्ट्या सुतरां सुलभमपि गौरवैः भावार्थैः अगाधतमं, तत्वदृष्टिद्वारा नितराम् अनवबोध्यं, अतुलितभगवच्छ्रीसपरिवारसीतारामचन्द्राप्राकृतकल्याणगुणगणाढ्यम् इत्यतः, श्रीमद्रामायणविवुवूर्षवः महान्तो विद्वांसः श्रीकृष्णसूरि-श्रीगोविन्दराज-रामवर्म-माधवयोगि-महेश्वरतीर्थ-त्र्यम्बकरायमखि-सत्यतीर्थादयः अद्यावधि बहवः कृत्स्नस्य स्विदेकदेशस्य वा अस्य विवुवूर्षायां व्याख्यानैः व्याख्यातारः, श्रीपरमभागवतोत्तमाश्च श्रीभगवद्गुणानुभूतौ श्रीरामकर्णरसायनरामकथामृतमधुरान्तकाष्टकादिस्तोत्रग्रन्थैः श्रीराघवशतकादिकीर्तनसन्दर्भैः , वितर्ककर्कशाः तात्पर्यनिर्णयादिविचारप्रबन्धैः तत्वविवित्सायां च प्रविष्टाः तद्वारा तत्वजिज्ञासवः

लोकस्य च तत्तत्वोपदिदिक्षवः परमकृपालवः लोकोपकरणार्थं स्वकीयया अनितरसाधारण्यया शैल्या श्रीवाल्मीकिहृदयभावान् आविष्कर्तुकामाः व्यख्यानटीकाटिप्पिणीस्तोत्रकीर्तनादीन् अनुपमान् ग्रन्थान् प्रनेनयामासुः॥

## २. प्रकरणम्

तत्र तत्रभवद्भिः श्रीमहेश्वरतीर्थैः प्रणीतेयं टीकाव्याख्या रामायणतत्वदीपिकाख्या सर्वोपरि वर्वर्ति रामायणगूढतत्त्वोद्दीपनात् , विराधखररावणैः प्रोक्तानां निष्ठुरवचनानां वास्तविकार्थकथनाच्च । एषां महतां चरित्रसम्प्रदायादिविषये प्रमाणं बहु न लभ्यते । केचन अमून् विद्वन्मणीन् श्रीमद्रामायणस्य आदौ उपक्रमे शतकोटिप्रविस्तरत्वकथनेन मध्वमतानुयायिनः, आरण्यकाण्डे अष्टचत्वारिंशसर्गे षोडशश्लोकस्य व्याख्यानावसरे ईश्वरस्य मायोपाधिकत्वाङ्गीकरणेन च अद्वैतसिद्धान्तिनश्चेति अनुमान्ति । नाहं अन्वेष्टा, अत्र कालदेशवंशमतादीनां चर्चाविषये मीमांसकाः एव शरणम् । तद्व्याख्यानद्वारा इदमहं जाने , यदमी श्रीरामभक्ताः बहुमानितवाल्मीकिकवयः समादृतसमस्तसाधुसङ्घाः श्रीरामायणतत्वदीपिकोद्दीपकाः व्याख्यानचक्रवर्तिषु मुख्यतमाः परमप्रमाणभूताः इति । स्वकीये व्याख्याने अमीषां रामायणस्य तत्वार्थकथनमेव प्रप्रथमं लक्ष्यमासीत्। तदङ्गत्वेन अन्यानि कानिचनापि लक्ष्यानि आसन्।तानि, शब्दसुशोधनं,पदानां निघण्ट्वर्थकथनं, तथा प्रधानतया सीतारामौ अभिसन्धाय विराधखररावणपरुषोक्तिवास्तवार्थप्रतिपादनम् इति । तत्वदीपिकाप्रस्तावे एतैः इत्थमेव प्रतिजज्ञे

**“ग्रन्थबाहुल्यभीत्यात्र क्वचिच्छब्दसुशोधनम्”**
**निघण्टुकथनं चार्थः पदानां लिख्यतेऽधुना ॥**
**सीतारामौ समुद्दिश्य विराधखररावणैः ।**

**उक्तानां परुषोक्तीनां वास्तवार्थोऽत्र वर्ण्यते ॥** इति

न च वाच्यं वास्तवार्थकथनं ग्रन्थकर्त्रभिप्रायबाधकं, शिष्टाचारानुमितत्वात् तत्वदीपिकायाः ।

तदुच्यते ग्रन्थादौ -

**सर्वेषां ग्रन्थकर्तॄणां लेखकोऽहं न कल्पकः ।**
**लिखितान्यत्र तै र्यानि लिख्यन्ते तान्यतो मया ॥** इति

एतत्सर्वं वास्तवार्थकथनं शिष्टाचारविशिष्टमिति भावः ।

एवञ्च अशेषव्याख्यानानां श्रीग्रन्थे तन्नायके च भक्त्याविष्कारे तत्तत्वजिज्ञासायाम् एव लक्ष्यत्वात् , एतादृशानां मूलस्थशब्दानां क्लिष्टार्थकल्पनं पदार्थपरिवर्तनं पदच्छेदविपरिणामः अन्वयविपर्यासः अन्ते अर्थव्यतिक्रमः इत्यादयः गुणायैव कल्पेरन् न तु दोषाय । यतो हि लोकः सर्वोऽपि न ज्ञानवान्, ब्रह्माण्डमध्यगताः सर्वेऽपि जनाः न जन्मना तत्वजिज्ञासवः, अपि च, जनता नूनं रामायणपठनेन ग्रन्थकारहृदयं, ग्रन्थस्थभावान्, श्रीरामचन्द्रकल्याणगुणान्, विपरीतत्वेन प्रतीयमानानि सीतारामसमुद्दिष्टविराधखररावणादीनां कटुभाषणानि, सीतालक्ष्मणसंवादं आरण्यकाण्डे, अग्निप्रवेशघट्टे सीतारामसंवादादींश्च याथातथ्येन जानीयादिति व्याख्यानकाराणां विश्वसयोग्या न स्यात् । अतः ते परमया कृपया व्यख्यानद्वारा तत्वार्थकथनेन च श्रीग्रन्थतन्नायिकानायकेषु जनतायाः भक्तिं विधाय तन्माध्यमेन ग्रन्थस्वरूपज्ञापकाः भवन्ति । तस्मात् अत्र तीर्थीये अर्थविपर्यासादि भक्तिजनकमेव न तु ग्रन्थमूलार्थबाधकं इति अलं विस्तृतप्रतिपादनेन ॥

## ३. विराधपरुषोक्तिः

आरण्यकाण्डे द्वितीयसर्गव्याख्यानम्

तीर्थीयम् –

ती. विराधेन सीताहरणं स्वाघौघपरिहार्थमेव न तु दारबुद्ध्या तदुक्तं स्कान्दे -

**सोऽपि तां जानकीं दृष्ट्वा शीघ्रं सञ्जातविक्रमः**
**इयं पुरा महाशक्तिः सेयं स्वर्गस्य कारणम् ॥**
**अस्या विबोधो मोक्षेऽपि कारणं बन्धनेऽपि च।**
**तस्मादिमां भजिष्यामि दिष्ट्या प्राप्तं हि दर्शनम् ॥**

**इति दर्शनमात्रेण विमुक्ताघौघपञ्जरः ।**
**भक्तियुक्तो जहारैनां सीतां चैतन्यरूपिणीम् ॥** इति

न च वाच्यं “परदाराभिमर्शाच्च नान्यत्पापतरं महत्” (३-३८-३०)इत्युक्तौ सत्यां सीताभिमर्शनं पापहरं न स्यादिति, तात्विकदृष्ट्या सीताम्बास्वरूपज्ञाने सिद्धे, दारबुद्धिरूपपापबुद्ध्या अनभिमृष्टस्य अभिमर्षस्य पापासम्भवात्, सीताम्बामाहात्म्याच्च  पापपुञ्जनाशसिद्धेः । तदर्थं स्कान्दवचनं प्रमाणीकृतमत्रेत्यवधेयम् ॥ तर्हि अयं विमुक्तो वेति चेत् ? तत्स्वयं कथयति –

**“तव प्रसादान्मुक्तोऽहमभिशापात्सुदारुणात्” (३-०४-१९)**

अनेन **( “अस्या विबोधे मोक्षेऽपि” इत्यत्र)** स्कान्दपुराणवचनस्य पारमार्थिको मोक्षो नेष्यते अपि तु शापविमोक्ष एवेष्यते इति ज्ञेयम् ।

द्वितीयसर्गे अष्टमश्लोकात् एकविंशतिश्लोकपर्यन्तं व्याख्यानसन्दर्भः –-

**स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम् ।**
**अभ्यधावत संक्रुद्धः प्रजाः काल इवान्तकः ।।८।।**

**तीर्थीयम् —**

**“स रामं लक्ष्मणं दृष्ट्वा” इत्यारभ्य “किमर्थं परितप्यसे” इत्यन्तस्य ग्रन्थसन्दर्भस्य वास्तवार्थस्तु —**

सः विराधः रामं लक्ष्मणं वैदेहीं च दृष्ट्वा संक्रुद्धस्सन् सीतामभ्यधावत् ग्रहीतुमिति शेषः ॥

**स कृत्वा भैरवं नादं चालयन्निव मेदिनीम् ।**
**अङ्केनादाय वैदेहीमपक्रम्य ततोऽब्रवीत् ।।९।।**

**तीर्थीयम् —**

रामादीन् दृष्ट्वा तत्तेजयाभिभूतो विराधः स्ववृत्तान्तं कथयन् तान् पृच्छति " स कृत्वेत्यादिश्लोकपञ्चकेन ।

ततः स विराधः अङ्के* समीपे आगत्येति शेषः । वैदेहीम् अनादाय (अङ्के अनादाय इतिच्छेदः) अपक्रम्य अब्रवीत् रामलक्ष्मणौ इति शेषः ।

*** अङ्कशब्दस्य समीपमित्यर्थः केवलं तीर्थैः प्रोक्तः तत्र प्रमाणमधः प्रदीयते मया।**

("प्रेम्णोपकण्ठं मुहुरङ्कभाजो रत्नावलीरम्बुधिराबबन्धेति" इति माघे ३.३६ । तत्र "अङ्कः समीपे उत्सङ्गे चिह्ने स्थानापराधयोः इति केशवः" तद्व्याख्याने मल्लिनाथः )

**युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ ।**
**प्रविष्टौ दण्डकारण्यं शरचापासिधारिणौ।।१०।।**

युवामिति । सभार्यौ सभायाम् आर्यौ । क्षीणजीवितौ क्षीणं जीवितम् अरीणां याभ्याम् । शरचापासिधारिणौ सन्तौ जटाचीरधरौ सन्तौ दण्डकारण्यं प्रविष्टौ ।

**कथं तापसयो र्वां च वासः प्रमदया सह।**
**अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ।।११।।**

यद्यपि तापसयो र्वां प्रमदया सह वासः यद्यपि तथापि कथं पापौ कथं मुनिदूषकौ, तादृशौ न भवतः इत्यर्थः । अत्र हेतुः — अधर्मचारिणौ अधर्मं चरतः भक्षयतः (चर गतौ भक्षणे) नाशयतः ( भक्षणक्रियायाः नाशार्थः विष्णुसहस्रनामस्तोत्रे प्रसिद्धः " एको विष्णु र्महद्भूतम्" इत्यत्र) । एतादृशविशेषणविशिष्टौ कौ युवां ?

**अहं वनमिदं दुर्गं विराधो नाम राक्षसः ।**

**चरामि सायुधो नित्यमृषिमांसानि भक्षयन्।।१२।।**

**इयं नारी वरारोहा मम भार्या भविष्यति ।**

**युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे।।१३।।**

किञ्च अहमिति । अहं विराधो नाम राक्षसः इदानीं मम पापयोः पापाभ्यां हस्ताभ्यामिति शेषः ( षष्ठी तृतीयया विपरिणम्यते) । ऋषिमांसानि भक्षयन् सायुधो मृधे रुधिरं पास्यामीति धिया दुर्गं वनं चरामि । किञ्च (भार्या इत्यत्र भया आर्यौ इति विग्रहः ) भया कान्त्या आर्या श्रेष्ठा इयं नारी युवयोः का भविष्यतीति तावब्रवीदिति पूर्वेण सम्बन्धः

**तस्यैवं ब्रुवतो धृष्टं विराधस्य दुरात्मनः ।**

**श्रुत्वा सगर्वितं वाक्यं सम्भ्रान्ता जनकात्मजा ।**

**सीता प्रावेपतोद्वेगात् प्रवाते कदली यथा ।।१४।।**

तस्येति । ऋषिमांसानि भक्षयन् चरामीत्येवं दुष्टं यथा तथा विराधस्य ब्रुवतः सतः सीता प्रावेपत ।

**तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभां ।**

**अब्रवीत् लक्ष्मणं वाक्यं मुखेन परिशुष्यता।।१५।।**

तामिति। विराधाङ्के विराधस्य समीपे प्रवेशितां स्थितामित्यर्थः । सीतां दृष्ट्वा परिशुष्यता मुखेन उपलक्षितः सीताभीत्येति शेषः । अब्रवीत् ।

**पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसम्भवाम् ।**

**मम भार्यां शुभाचारां विराधाङ्के प्रवेशितां॥१७॥**

**अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम् ।**

पश्येति विराधाङ्के तत्समीपे प्रवेशितां स्थितां।

**यदभिप्रेतमस्मासु प्रियं वरवृतं च यत्॥१८॥**

**कैकाय्यास्तु सुसंपन्नं क्षिप्रमद्यैव लक्ष्मण॥**

**या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी॥१९॥**

**ययाहं सर्वभूतानां हितः प्रस्थापितो वनम् ॥**

**अद्येदानीं सकामा सा या माता मम मध्यमा ॥२०॥**

यदभिप्रेतमित्यादिवाक्यानि सीताभीतिनिमित्तेन उक्तानीति द्रष्टव्यानि ।

**परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे ।**

**पितुर्वियागात्सौमित्रे स्वराज्यहरणात्तथा ॥**

**इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुते ।**

**अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन्॥**

**अनाथ इव भूतानां नाथस्त्वं वासवोपमः ।**

**मया प्रेष्येण काकुत्स्थे किमर्थं परितप्यसे ॥**

परस्पर्शात् परस्य राक्षसस्य स्पर्शात् समीपगमनादित्यर्थः । बाष्पशोकपरिप्लुते सीताभीतिनिमित्तमिति भावः ।

## ४. खरपरुषोक्तिः

आरण्यकाण्डे एकोनविंशसर्गस्य व्याख्यानसन्दर्भः । शूर्पणखाखरसंवादः।

**तस्याचानृजुवृत्तायास्तयोश्च हतयोरहम् ।**
**सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १९॥**

**एष मे प्रथमः कामः कृतस्तात त्वया भवेत्।**
**तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥२०॥**

तस्याश्चानृजुवृत्ताया इत्यादि श्लोकद्वयस्य वास्तवार्थस्तु –

रणमूर्धनि तयोः रामलक्ष्मणयोः । तृतीयार्थे षष्ठी ।(रामलक्ष्मणाभ्यामित्यर्थः)। अनृजुवृत्तायाः तस्याः त्वद्भगिन्याः ममेति शेषः । हतयोः छिन्नयोः। द्वितीयार्थे षष्ठी । कर्णनासिके पश्येति शेषः। अतः इतःपरं सफेनमपि रुधिरं पातुमिच्छामीति काकुः। नेच्छाम्येवेत्यर्थः। आहवे तयोः त्वयं कृतो भवेत् यदि अपकारः इति शेषः । छिन्नकर्णनासां मां दृष्ट्वाप्युपेक्षसे यदि तदा त्यक्ताहारा देहं त्यक्षामीति भावः ॥

इति तस्यां ब्रुवाणायामित्यारभ्य सर्गसमाप्तिपर्यन्तस्य वास्तवार्थस्तु –

**इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ।**
**व्यादिदेश खरःक्रुद्धो राक्षसानन्तकोपनान्।२१।**

इति तस्यां ब्रुवाणायां रामवृत्तान्तमिति शेषः । खरः

**“तस्माद्यः क्रूररूपेण देहेन हरतामृतम्”।**
**विष्णुर्दाशरथिर्भूत्वा मोक्षयिष्यति सुव्रत॥**

इति शिवशापात् राक्षसत्वं प्राप्तयाज्ञवल्क्यसुतः चन्द्रकान्तः इत्यर्थः । अत एव शूर्पणखामुखात् रामवृत्तान्तश्रवणानन्तरं (रामं) विष्णुत्वेन ज्ञात्वा सपरिवारस्य स्वस्य रामहस्तात् वधेच्छुः सन् भगिनीप्रीतय इव रामेण सह युद्धार्थं राक्षसान् व्यादिदेशेत्यर्थः । अस्मिन्नर्थे शेषधर्मे भीष्मयुधिष्ठिरसंवादकथानुसन्धेया । भीष्मः —

**"याज्ञवल्क्यसुता राजन् त्रयो वै लोकविश्रुताः"**

**चन्द्रकान्तमहामेधविजया ब्राह्मणात्तमाः ॥**

**खरश्च दूषणश्चेति त्रिशिरा ब्रह्मवित्तमाः ।**

**आसन् तेषां च शिष्याश्च चतुर्दशसहस्रधा ॥** इति ।

अत एव बाह्यदृष्ट्या परुषोक्तिवत्प्रतीयमानानि तस्य वाक्यानि सौम्यरूपाण्येव तथा व्याख्यास्यामः ॥२२॥

**तौ हत्वा तां च दुर्वृत्तामपावर्तितुमर्हथ ।**

**इयं च रुधिरं तेषां भगिनी मम पास्यति ॥२३॥**

**मनोरथोयमिष्टोऽस्या भगिन्या मम राक्षसाः ।**

**शीघ्रं सम्पाद्यतां तौ च प्रमथ्य स्वेन तेजसा ।२४।**

तौ हत्वेति श्लोकद्वयम् एकं वाक्यम्। प्रतीतिकार्थः स्पष्टः । वस्तुतस्तु हे राक्षसाः! इयं भगिनी (मां) प्रमथ्य मम रुधिरं पास्यति अतस्तेषां समीपं गत्वा स्वतेजसा शीघ्रेण तौ रामलक्ष्मणौ दुर्वृत्तां दुर्लभं वृत्तम् आचारः यस्याः तां सीतां च हत्वा ज्ञात्वा "हन हिंसागत्योः" इति धातोः गत्यर्थस्य ज्ञानार्थत्वात्। अपावर्तितुं प्रतिनिवर्तितुमर्हथ । अयं मम भगिन्याः इष्टः मनोरथः ॥ २३॥ ॥२४॥

विंशे सर्गे रामेण सह खरप्रेषितचतुर्दशराक्षसानां संवादस्य व्याख्यानसन्दर्भः –

**क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः।**
**त्वमेव हास्यसे प्राणानद्यास्माभि र्हतो युधि॥१२॥**

**का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि।**
**अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ।१३।**

**एहि बाहुप्रयुक्तै र्नः परिघैः शूलपट्टिशैः।**
**प्राणांस्त्यक्षसि वीर्यं च धनुश्च करपीडितम् ॥१४॥**

क्रोधमुत्पाद्येत्यादिश्लोकत्रयस्य प्रतीतिकार्थः स्पष्ट । वस्तुतस्तु – सुमहात्मनः सुमहान् आत्मा शरीरं यस्य सः। भर्तुः राज्ञः खरस्य क्रोधमुत्पाद्य तत्प्रेरितैः अस्माभिरिति तुच्छैः हतस्ताडितोऽपि प्राणान् नो हास्यस्येव ॥१३॥

अत्र हेतुः – का हीति। रणमूर्द्धनि एकस्य ते अग्रतः स्थातुं बहूनामप्यस्माकं का शक्तिः? शक्ति र्नास्ति तदा किं पुनर्योद्धुमिति योजना। अत एव खरनिर्बन्धेन आगतानाम् अस्माकमित्यत्रापि आकृष्यते । परिघादिभिरुपलक्षितानामस्माकं प्राणान् । वीर्यमित्यादि जात्येकवचनम्। वीर्यादिकं च त्यक्ष्यसि । गर्भितो णिच् । त्याजयिष्यसि न सन्देहः अत एव हीति सम्बन्धः । इतः परावृत्य गतानामस्माकं खरहस्तवधात् वरं त्वद्धस्तेन वध इति भावः ॥१४–१६॥

एकविंशसर्गे कतिपश्लोकानां वास्तवार्थकथनम्

**रामेण यदि ते शक्तिः तेजो वास्ति निशाचर।**

**दण्डकारण्यनिलयं जहि राक्षस कण्टकम्।१४।**

**यदि रामं ममामित्रं न त्वमद्य वधिष्यसि।**
**तव चैवाग्रतः प्राणांस्त्यक्षामि निरपत्रपा।१५।**

रामेणेत्यादिश्लोकचतुष्टयस्य प्रातीतिकार्थः स्पष्टः। वस्तुतस्तु शूर्पणखा रामं न जहीति हितबुद्ध्या खरं निवारयति रामेणेति । हे निशाचर! रामेण ते शक्तिः वीर्यं तेजा वास्ति यदि तथापि अमित्रघ्नं दण्डकारण्यनिलयं रामं त्वं न जहि मावधीः। यदि हनिष्यसि तर्हि तवाग्रतोऽहं प्राणान् त्यक्षामीति सम्बन्धः ।१४।१५।

**बुद्ध्याहमनुपश्यामि न त्वं रामस्य संयुगे ।**
**स्थातुं प्रतिमुखे शक्तः सबलश्च महात्मनः।१६।**

**शूरमानी न शूरस्त्वं मिथ्यारोपितविक्रमः।**
**मानुषौ यौ न शक्नोषि हन्तुं तौ रामलक्ष्मणौ।१७।**

विचार्यमाणे तयोर्हनने तव शक्तिरपि नास्तीत्याह— बुद्ध्येति । रामस्य प्रतिमुखे अग्रतः स्थातुं न शक्त इति बुद्ध्या पश्यामि आलोचयामीति सम्बन्धः । सबलश्च महारणे इति पाठः । महारणे यो मिथ्यारोपितविक्रमः अत एव शूरमानी अत एव न शूरः अत एव तौ मानुषावपि हन्तुं न शक्नोषीति सम्बन्धः ॥१६॥१७॥

द्वाविंशसर्गव्याख्यानम् तत्र खरस्य शूर्पणखां प्रति संवादस्य वास्तवार्थकथनम् —

**तवावमानप्रभवः क्रोधोऽयमतुलो मम ॥**

**न शक्यते धारयितुं लवणाम्भ इवोत्थितम्॥२॥**

तवावमानप्रभवः इत्यादिश्लोकचतुष्टयस्य वास्तवार्थस्तु – तवावमानप्रभवः त्वत्सम्बन्धि अवमानोत्पन्नः मयि त्वरया कृतावमानप्रभवः इत्यर्थः । क्रोधः धारयितुं न शक्यते ।

**न रामं गणये वीर्यान्मानुषं क्षीणजीवितम् ।**

**आत्मदुश्चरितैः प्राणान्हतो योऽद्य विमोक्ष्यति॥**

किञ्च मानुषं च वीर्यात् मच्छौर्यात् क्षीणजीवितं न गणये, तमहं जेतुं न शक्नोमीत्यर्थः । स राम एव प्राणान् मदीयप्राणान् मोक्ष्यति मोक्षयिष्यतीत्यर्थः । अतः हे दुर्भगे! आत्मदुश्चरितैः स्वापचारव्यापारैः अद्य अयं मच्छुभावहविधिः हतः। त्वन्निमित्तं ममैश्वर्यं क्षीणजीवितं च नष्टमिति भावः॥३॥

**बाष्पः संह्रियतामेष सम्भ्रमश्च विमुच्यताम्।**

**अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥४॥**

इतः परं बाष्पः संह्रियतां सम्भ्रमश्च विमुच्यताम्। अहं भ्रात्रा सह रामं प्रति यामि यमसादनं च यामि न सन्देहः॥४॥

**परश्वधहतस्याद्य मन्दप्राणस्य संयुगे ।**

**रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि॥५॥**

ततःपरं रामस्य परश्वधहतस्य रामसम्बन्धिपरश्वधेन हतस्य मन्दप्राणस्य भूतले पतितस्य, ममेति शेषः । हे राक्षसि! रुधिरं पास्यसीति सम्बन्धः ॥५॥

सप्तविंशसर्गे त्रिशिरसः खरेण सह संवादव्याख्यासन्दर्भः –

**मां नियोजय विक्रान्त सन्निवर्तस्व साहसात्।**

**पश्य रामं महाबाहुं संयुगे विनिपातितम्॥२॥**

सप्तविंशे सर्गे मां नियोजयेत्यादिसार्धश्लोकचतुष्टयस्य वास्तवार्थस्तु – हे खर! संयुगे रामं च तेन विनिपातितं सैन्यं चेति शेषः । पश्य अतस्त्वं साहसात् निवर्तस्व मां नियोजय।

तर्हि त्वं तं हनिष्यसि किम्? तत्राह प्रतिजानामीत्यादि –

**प्रतिजानामि ते सत्यमायुधं चाहमालभे।**
**यथा रामं वधिष्यामि वधार्हं सर्वराक्षसाम्॥३॥**

सर्वराक्षसां वधार्थं सर्वरक्षसां हन्तारमित्यर्थः। रामं यथा यथावत्। अहं प्रतिजानामि सम्यग्जानामीत्यर्थः। अतः तं वधिष्यामीति सर्वमायुधमालभे ग्रहिष्यामि केवलमित्यर्थः।

हन्तुमशक्यश्चेत् अनेन किम्? तत्राह – अहमिति

**अहं वास्य रणे मृत्युरेष वा समरे मम।**
**विनिवृत्य रणोत्साहान्मुहूर्तं प्राश्निको भव॥४॥**

अस्य रामस्य अहं वा रणे मृत्युः, किन्तु एष वा एष राम एव समरे मम मृत्युः, अतस्त्वं महोत्साहात् विनिवर्तस्व मुहूर्तं प्राश्निको (जयापजयनिर्णायकः) भवेति सम्बन्धः ।

**प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि।**
**मयि वा निहते रामं संयुगायोपयास्यसि॥५॥**

**खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः।**
**गच्छ युद्ध्येत्यनुज्ञातो राघवाभिमुखो ययौ॥६॥**

प्रहृष्ट इति। प्रहृष्टो वा हते इत्यत्र अहते इति पदच्छेदः । रामे अहते सति मयि च निहते सति प्रहृष्टस्त्वं रामं प्रति संयुगायोपयास्यसि । अथवा जनस्थानं वा प्रयास्यसीति सम्बन्धः। प्रसादितः प्रार्थितः। युद्ध्य युद्धं कुरुष्व॥४॥५॥

एकोनत्रिंशस्सर्गे श्रीरामेण निर्भत्सितस्य खरस्य श्रीरामं प्रति परुषोक्तेः वास्तवार्थप्रतिपादनम् –

**प्राकृतान् राक्षसान्हत्वा युद्धे दशरथात्मज।**

**आत्मना कथमात्मानमप्रशस्यं प्रशंससि ॥१६॥**

प्राकृतानित्यादीनां वास्तवार्थस्तु–

आत्मानं प्रशंससि इह महात्मनस्तवैतन्न युक्तमिति भावः॥१६॥

**विक्रान्ता बलवन्तो वा ये भवन्ति नरर्षभाः।**

**कथयन्ति न ते किञ्चित्तेजसा स्वेन गर्विताः॥१७॥**

विक्रान्ता इति। ये नरर्षभाः त्वादृशमहात्मानस्ते एवं न कथयन्ति। केचित् स्वतेजसा गर्विताः कथयन्ति। अतस्तवोचितं न भवतीति भावः॥१७॥

**प्राकृतास्त्वकृतात्मानः लोके क्षत्रियपांसनाः।**

**निरर्थकं विकत्थन्ते यथा राम विकत्थसे॥१८॥**

प्राकृता इति । क्षत्रियपांसना यथा निरर्थकं विकत्थन्ते, तथा त्वं विकत्थसे तव न युक्तमिति भावः॥१८॥

**कुलं व्यपदिशन्वीरः समरे कोऽभिधास्यति।**

**मृत्युकाले हि सम्प्राप्ते स्वयप्रस्तवे स्तवम्॥१९॥**

कुलमिति। समरे शत्रुपक्षस्य मृत्युकाले सम्प्राप्ते सति स्तवं को वाभिधास्यति, न कोऽपीत्यर्थः।

**सर्वथैव लघुत्वं ते कत्थनेन विदर्शितम् ।**

**सुवर्णप्रतिरूपेण तप्तेनेव कुशाग्निना॥२०॥**

सर्वथेति। आत्मानम् एवं भाषयसि यदि तदा तव लघुत्वमेव प्रदर्शितं भविष्यति । अतस्तवैतन्न युक्तमिति भावः।

**न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् ।**

**धराधरमिवाकम्प्यं पर्वतं धातुभिश्चितम् ॥२१॥**

**पर्याप्तोऽहं गदापाणिर्हन्तुं प्राणान् रणे तव।**

**त्रयाणामपि लोकानां पाशहस्त इवान्तकः॥२२॥**

नत्विति । हे राम! गदाधरं मा पश्यसि ननु, एतादृशगदापाणिरहं पाशहस्तोऽन्तक इव त्रयाणामि लोकानां प्राणान् हन्तुं पर्याप्तः यद्यपि तथापि रणे तल न पर्याप्तः इति शेषःय२१॥२२॥

**चतुर्दश सहस्राणि राक्षसानां हतानि ते ।**

**त्वद्विनाशात्करोम्येष तेषामश्रुप्रमार्जनम्॥२४॥**

चतुर्दशेति । राक्षसानां चतुर्दशसहस्राणि ते त्वया हतानि तथा त्वन्नाशात् त्वत् त्वत्तः नाशात् मन्नाशात् त्वत्तो मन्नाशे सतीत्यर्थः। तेषां तद्दारादीनाम् अश्रुमार्जनं करोमीति सम्बन्धः । त्वदिति घातयितु र्मम मरणे तद्दाराणां दुःखनिवृत्ति र्भवतीति भावः॥२४॥

त्रिंशस्सर्गे श्रीरामभर्त्सनश्रवणोत्थमन्युः समासन्नमृत्युरयं खरः श्रीरामं निर्भर्त्सयति । तत्र व्याख्यानसन्दर्भः –

**तमेवमभिसंरब्धं ब्रुवाणं राघवं रणे ।**
**खरो निर्भर्त्सयामास रोषात्खरतरस्वनः॥१३॥**

**दृढं खल्वलिप्तोसि भयेष्वपि च निर्भयः।**
**वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुद्ध्यसे॥१४॥**

तमेवेत्यादिश्लोकत्रयस्य प्रातीतिकार्थः स्पष्टः। वस्तुतस्तु– एवं ब्रुवाणं रामं मृत्युवश्यः खरः हे राम त्वं वाच्यावाच्यं न बुद्ध्यस इति दृढमवलिप्तोसीति च निर्भर्त्सयामास च सम्बन्धः ।

एवं निर्भर्त्सने हेतुमाह कालपाशेति –

**कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ते।**
**कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः॥१५॥**

लोके कालपाशपरिक्षिप्ताः पुरुषाः महात्मानमपि निर्भर्त्सयन्त्येवेति भावः॥१५॥

## ५. रावणपरुषोक्तिः

अकम्पनेन कथितं श्रीरामवैभवं श्रुत्वा,

”तस्यापहर भार्या त्वमिति” तेनैव श्रीसीतापहरणे चोदितो रावणः तद्वाक्यमरोचयत । तत्र वास्तवार्थस्तु —

**अरोचयत तद्वाक्यं रावणो राक्षसाधिपः।**
**चिन्तयित्वा महाबाहुरकम्पनमुवाच ह॥३२॥**

अरोचयत तद्वाक्यमित्यस्य वास्तवार्थस्तु—

चिन्तयित्वा अकम्पनात् रामवृत्तान्तश्रवणानन्तरं चिन्तयित्वा त्रेतायुगे श्रीरामोऽवतरिष्यतीति सनत्कुमारवाक्यं स्मृत्वेत्यर्थः । श्रीरामहस्ताद्वधेच्छू रावणः तद्वाक्यं तस्य अकम्पनस्य वाक्यं सीतामपहरेत्येवंरूपं वचनमरोचयत अनुकूलत्वेन अङ्गीचकारेति सम्बन्धः। अस्मिन्नर्थे उत्तररामायणोक्ता सनत्कुमाररावणसम्बन्धिनी अगस्त्यरामसंवादरूपा कथानुसन्धेया ।

तथाहि रामं प्रति अगस्त्यवचनम् —

( अत्रेदमवबोद्ध्यम् —श्रीरामम् अगस्त्यः रावणस्य श्रीसीताम्बाहरणे कारणकथनं सनत्कुमाररावणसंवादरूपेणोवाच ।

एतत्सर्वं गोविन्दराजीयादिव्याख्यानालङ्कृते श्रीमद्रामायणपुस्तके उत्तरकाण्डे सप्तत्रिंशसर्गान् अनु “अधिकपाठश्लोकारम्भः” इति शीर्षकेन प्रक्षिप्तेषु पञ्चसर्गेषु द्वितीयतृतीयसर्गयोः वर्णितमिति दिक् ॥ )

उत्तरकाण्डे प्रक्षिप्तसर्गेषु द्वितीयसर्गः

**“अथापरां कथां दिव्यां शृणु राजन् पुरातनीम्”**
**यदर्थं राम वैदेही रावणेन हृता पुरा ॥६॥**

**पुरा कृतयुगे राम प्रजापतिसुतं प्रभुम् ।**
**सनत्कुमारमासीनं रावणो वाक्यमब्रवीत् ॥७॥**

*रावणः —*

**दैत्यदानवयक्षांसि ये हताः समरेऽरयः।**
**कां गतिं प्रतिपद्यन्ते केन ते हरिणा हताः॥१८॥**

*सनत्कुमारः —*

**ये ये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन ।**
**ते ते गतास्तन्निलयं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः॥२१॥**

**श्रुत्वा ततस्तद्वचनं निशाचरस्सनत्कुमारस्य मुखाद्विनिर्गतम् ।**
**तदा प्रहृष्टस्स बभूव विस्मितः कथं नु यास्यामि हरिं महाहवे ॥२२॥**

उत्तरकाण्डे प्रक्षिप्तसर्गेषु तृतीयसर्गः

मुनिः—

**मनसश्चेप्सितं यत्तद्भविष्यति तदाहवे। सुखी भव महाबाहो किञ्चित्कालं प्रतीक्षय।२।**

**[*पाठभेदः—* किञ्चित्कालमुदीक्षय]**

**अथवा राक्षसेन्द्र त्वं यदि तं द्रष्टुमिच्छसि।**

**कथयिष्यामि ते सर्वं श्रूयतां यदि रोचते ॥१७।**

**कृते युगे व्यतीते वै मुखे त्रेतायुगस्य तु।**
**हितार्थं देवमर्त्यानां भविता नृपविग्रहः॥१८॥**

**इक्ष्वाकूणां च यो राजा भाव्यो दशरथो भुवि।**
**तस्य सूनुर्महातेजा रामो नाम भविष्यति ॥१९॥**

**एवं श्रुत्वा महाबाहुः राक्षसेन्द्रः प्रतापवान्।**
**त्वया सह विरोद्धेच्छुश्चिन्तयामास राघव ॥२७॥**

**सनत्कुमारात्तद्वाक्यं चिन्तयानो मुहुर्मुहुः।**
**रावणो मुमुदे मोहाद्युद्धार्थी विचचार ह॥**

अत्र पाठभेदः—

( सनत्कुमारात्तद्वाक्यं श्रुत्वा राक्षसपुङ्गवः।२८) (रावणो मुमुदे श्रीमान् युद्धार्थी विचचार ह।२९)

चतुर्थसर्गः —

**एतदर्थं महाबाहो रावणेन दुरात्मना ।**
**सुता जनकराजस्य हृता राम महामते॥४॥**

*पञ्चमसर्गः*—

**लङ्कामानीय यत्नेन मातेव परिरक्षिता॥११४॥** इत्यादि।

अत एव रावणस्य सीतारामभृत्यत्वेन तावुद्दिश्य तेन वक्ष्यमाणानि बाह्यदृष्ट्या दुर्भाषणवत्प्रतीयमानान्यपि वाक्यानि वस्तुतः स्तुतिपराण्येव । तथा तत्र तत्र व्याख्यास्यामः ॥३२॥

षट्त्रिंशे सर्गे मारीचं प्रति रावणवाक्यव्याख्यानसन्दर्भः —

**पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः।**
**स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः॥१०॥**

**दुःशीलःकर्कशस्तीक्ष्णोमूर्खोलुब्धोऽजितेन्द्रियः**
**त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः॥११॥**

पित्रेत्यादिश्लोकद्वयस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु —

क्रुद्धेन पित्रा निरस्तः निष्कासितः किम्? किन्तु, कैकेयीवरदानसमये हि तेन पित्रा प्रार्थितः सन् वनमागतः । सभार्यः सभायाम् आर्यः सभ्यः । क्षीणजीवितः किम्? किन्तु तस्य खरस्य सैन्यस्य संहर्ता । कुतः? क्षत्रियपांसनः क्षत्रियान् पातीति क्षत्रियपः स च असौ अंसनश्च शत्रुनाशकः "अंस समघाते" इति धातुः। अत एव अशीलः किम्? किन्तु सद्वृत्तः । तथापि कर्कशः कठिनः, शत्रुविषय इति शेषः । तीक्ष्णः क्रौर्य्येषु अनलसः । अत एव अमूर्खः अलुब्धः जितेन्द्रियश्च इति च्छेदः। त्यक्तधर्मः त्यक्ताः विरुद्धाः

धर्माः येनेति मध्यमपदलोपिसमासः । अत एव अधर्मात्मा किम्? किन्तु धार्मिक एव । अत एव भूतानामहिते अरतः सर्वभूतदयापर इत्यर्थः ॥१०॥११॥

चत्वारिंशसर्गे मारीचोक्तश्रीरामतच्चापबाणमाहात्म्यपथ्यहितवचनश्रवणोत्थमन्योः रावणस्य मारीचभर्त्सनमुखेन श्रीरामनिन्दायाः वास्तवार्थकथनम् –

**मारीचेन तु तद्वाक्यं क्षमं युक्तं निशाचरः।**
**उक्तो न प्रतिजग्राह मर्तुकाम इवौषधम्॥१॥**

**तं पथ्यहितवक्तारं मारीचं राक्षसाधिपः।**
**अब्रवीत्परुषं वाक्यमयुक्तं कालचोदितः॥२॥**

मारीचेनेत्यादेः हर्तव्या तव सन्निधावित्यन्तस्य ग्रन्थस्य वास्तवार्थेऽयमर्थः – तद्वाक्यं सीतां नाहरेति वाक्यं न जग्राह तं प्रति परुषवाक्यं चाब्रवीत् ।

तदेवाह यदिति–

**यत्किलैतदयुक्तार्थं मारीच मयि कथ्यते ।**
**वाक्यं निष्फलमत्यर्थमुप्तं बीजमिवोषरे ॥३॥**

हे मारीच! मयि सीताहरणकामे इत्यर्थः । अयुक्तम् अयोग्यार्थं । वाक्यं निष्फलम् ।

इदं चेद्युक्तमित्याह – त्वदिति ।

**त्वद्वाक्यैर्न तु मा शक्यं भेत्तुं रामस्य संयुगे।**

**पापशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥४॥**

मानुषस्य मूर्खस्य विशेषतः पापशीलस्य । द्वितीयार्थे षष्ठी। भेत्तुं शक्यं । रामस्य रामं तु मया भेत्तुं न शक्यमिति यदुक्तं त्वद्वाक्यैः तत्सत्यमेव ॥४॥

**यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा।**
**स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥५॥**

**अवश्यं तु मया तस्य संयुगे खरघातिनः।**
**प्राणैः प्रियतरा सीता हर्तव्या तव सन्निधौ ॥६॥**

करुणाशालितया प्राकृतस्त्रीवाक्यमपि श्रुत्वा राज्यादिकं त्यक्त्वा वनं गतः । तस्य सीता भार्या तु अवश्यं मया आहर्तव्येति सम्बन्धः । सीतापहरणाभावे स्वस्य रामहस्तात् मरणं न भविष्यतीति हृद्गतः ॥५॥६॥

श्रीरामचन्द्रेण स्वर्णमृगरूपमारीचे "हा सीते लक्ष्मणेति" कृतराघवसदृशस्वरे हते, तत्स्वरश्रवणव्याकुलया सत्कुलया श्रीसीतया स्वपातिव्रत्यं प्रदर्शयन्त्या, मनसापि अमानितमारे आर्ये करुणारम्भे अनृशंसे रघुकुललक्ष्मणि लक्ष्मणे अपसारिते, श्रीसीतामाहर्तुकामस्य रावणस्य वाक्यानां वास्तवार्थकथनं.

सप्तचत्वारिंशसर्गः –

**त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम्।**
**रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ॥२६॥**

त्वां तु काञ्चनवर्णाङ्गीमित्यादिश्लोकस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु – त्वां ममेष्टदेवतामित्यर्थः । दृष्ट्वा स्वकेषु पुत्रमित्रादिषु दारेषु च रतिम् इच्छां नाधिगच्छामि । ममेष्टदेवतायास्तव दर्शनेन आनन्दपूर्णोऽहं सर्वतो निवृत्तोऽस्मि ॥२६॥

**बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः।**

**सर्वासामेव भद्रं ते ममाग्रमहिषी भव॥२७॥**

इतस्तत आहृतानामुत्तमस्त्रीणां सर्वासां मम मे या अगिरमहिषी तस्याश्च मम च भव, ईश्वरीति शेषः॥२७॥

**लङ्का नाम समुद्रस्य मध्ये मम महापुरी।**

**सागरेण परिक्षिप्ता निविष्टा नगमूर्धनि ॥२८॥**

**तत्र सीते मया सार्धं वनेषु विहरिष्यसि।**

**न चास्यारण्यवासस्य स्पृहयिष्यसि भामिनी ॥२९॥**

लङ्केति श्लोकद्वयमेकं वाक्यम्। तत्र लङ्कायां वनेषु विहरिष्यसि यदि तदा अस्य अरण्यवासं न स्पृहयिष्यसि ॥२८॥२९॥

**पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः।**

**सीते परिचरिष्यन्ति भार्या भवसि मे यदि॥३०॥**

किञ्च पञ्चसहस्राणि दास्यः मे मया सार्धं परिचरिष्यन्ति यदि, तवेति शेषः। तदा भार्या भया कान्त्या आर्या पूज्या भवसीति सम्बन्धः॥३०॥

**रावणेनैवमुक्ता तु कुपिता जनकात्मजा।**

**प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम्॥३१॥**

रावणेन, पुत्रसदृशेनेति शेषः। एवं प्रार्थनारूपेण उक्तापि अतितामसभक्तो रावणः श्रीरामवियोगं सम्पादयतीति कुपिता जनकात्मजा प्रत्युवाचेति सम्बन्धः॥३१॥

“यदन्तरं सिहमसृगालयो र्वने” इत्यादिश्रीसीतावचनश्रवणेन सञ्जातरोषस्य रावणस्य स्वात्मवैभवपुरस्सरं तां प्रति परुषोक्तेः वास्तवार्थकथनम् ।

अष्टचत्वारिंशः सर्गः —

तत्र त्वं वसती सीते इत्यारभ्य तव भाग्येन संप्राप्तं भजस्व वरवर्णिनीत्यन्तस्य ग्रन्थसन्दर्भस्य प्रातीतिकार्थः स्पष्टः ।

**तत्र त्वं वसती सीते राजपुत्रि मया सह ।**
**न स्मरिष्यसि नारीणां मानुषीणां मनस्विनि ॥१३॥**

**भुञ्जाना मानुषान्भोगान्दिव्यांश्च वरवर्णिनि ।**
**न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥१४॥**

वस्तुतस्तु — तत्र लङ्कायां वसती त्वं मया भृत्येन समर्पितानिति शेषः। मानुषान् दिव्यांश्च भोगान् सह एकदैव भुञ्जाना सती मानुषीणां नारीणामिति द्वितीयार्थे षष्ठी । न स्मरिष्यसि । किञ्च मानुषस्य मनुष्यरूपेण अवतीर्णस्य । गतायुषः गतं प्राप्तम् अङ्गीकृतम् एकादशसहस्रवत्सरायुः येन तस्य रामस्य भगवतः श्रीमन्नारायणस्य सम्बन्धिनः इति शेषः। नः अस्मान् स्मरिष्यसि ॥१३॥१४॥

**स्थापयित्वा प्रियं पुत्रं राज्ञा दशरथेन यः।**
**मन्दवीर्यः सुतो ज्येष्ठस्ततः प्रस्थापितो ह्ययम् ॥१५॥**

स्थापयित्वेति। यः मन्दवीर्यः तम् अप्रियमपि पुत्रं भरतं अन्तर्यामिप्रेरितेन राज्ञा स्थापयित्वा । राज्य इति शेषः । ततस्तेनैव प्रेरितेन राज्ञा । ज्येष्ठः श्रीमन्नारायणः श्रीरामः “ज्येष्ठश्श्रेष्ठःप्रजापतिः” इति सहस्रनामोक्तेः । सर्वराक्षससंहाराय वनं प्रस्थापितः ॥१५॥

**तेन किं भ्रष्टराज्येन रामेण गतचेतसा ।**

**करिष्यसि विशालाक्षि तापसेन तपस्विना॥१६॥**

तेनेति । भ्रष्टराज्येन भ्रष्टम् अरीणां राज्यं येन तेन । गतचेतसा मायोपिधिकेश्वरस्य श्रीरामस्य अन्तःकरणाभावात् गतचेतस्कत्वं । "न तस्य कार्यं करणं च विद्यते" इति श्रुतेः* । तापसेनतपस्विना तापसानाम् इनः तापसेनः स चासौ तपस्वी च तेन श्रीरीमेण सह करिष्यसि किम्। अयमस्मदीय इति विज्ञापनामिति शेषः॥१६॥

(*श्वेताश्वतरोपनिषदि ६ अध्याये ८ मन्त्रः)

**सर्वराक्षसभर्तारं कामात्स्वयमिहागतम्।**

**न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि॥१७॥**

सर्वेति। सर्वराक्षसभर्तारं । प्रतिशब्द इवार्थे । कामात् तव भृत्यो भविष्यामीति मनोरथात्। आगतं मां मन्मथशराविष्टं जनमिव। स्वयं ममेष्टदेवता त्वम् एवम् आख्यातुं वक्तुं नार्हसीत्यर्थः ॥१७॥

**प्रत्याख्याय हि मां भीरु परितापं गमिष्यसि।**

**चरणेनाभिहत्येव पुरूरवसमुर्वशी॥१८॥**

प्रत्याख्यायेति। कामुकं पुरूरवसम् उर्वशी चरणेन अभिहत्य पश्चात्तापमगमदिति यत् तद्युक्तं। अकामुकं भृत्यं मां मम मातृरूपा त्वं चरणेन अभिहत्य तिरस्कृत्येत्यर्थः । परितापं गमिष्यसीत्येतत् अयुक्तमित्यर्थः। उर्वशी पुरूरवसं चरणेनाभिहत्य पश्चात्तापं गतेति पुराणेषु यथा प्रसिद्धं तथा पश्चात्तापं गमिष्यसि॥१८॥

रामं विना लङ्कां प्रत्यागन्तुम् अनिच्छन्तीं प्रत्याह— अङ्गुल्येति।

**अङ्गुल्या न समो रामो मम युद्धे स मानुषः।**

**तव भाग्येन संप्राप्तं भजस्व वरवर्णिनि॥१९॥**

युद्धे यस्य अङ्गुल्या समः कोऽपि नास्ति । कुतः यः स रामः श्रीमन्नारायण एव । मानुषः मनुष्यरूपेण अवतीर्णः । तं मम भाग्येन तत्रैव संप्राप्तं तव पतिमिति शेषः । भजस्वेति सम्बन्धः॥१९॥

एकोनपञ्चाशे सर्गे श्रीसीताहरणघट्टे रावणोक्तपरुषवाक्यानां वास्तवार्थत्वप्रतिपादनम् —

**त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि।**

**मामाश्रय वरारोहे तवाहं सदृशः पतिः॥११॥**

त्रिषु लोकेषु विख्यातमित्यादिसार्धचतुष्टयश्लोकस्य प्रातीतिकार्थः स्पष्टः। कुलकम् । वस्तुतस्तु—

भर्तारं शुश्रूषादिना स्वामिनं बिभर्तीति भर्ता, भत्य इत्यर्थः। पतिः रक्षसामिति शेषः । यद्यहं रक्षसां पतिः तथापि तव सदृशः अनुरूपः किम् ? भृत्य इति शेषः । अनुरूपो भृत्यो न भवामि तथापि भृत्यमिच्छसि यदि त्रिषु लोकेषु विख्यातं यथा तथा मामाश्रय भत्यत्वेन अङ्गीकुरु॥११॥

कुतः?

**मां भजस्व चिराय त्वमहं श्लाघ्यः प्रियस्तव।**

**नैव चाहं क्वचिद्भद्रे करिष्ये तव विप्रियम्॥१२॥**

चिराय चिरकालादारभ्य तव श्लाघ्यः प्रियः प्रीणयति शुश्रूषादिना स्वामिनमिति प्रियो भृत्यः। जयस्यैव रावणरूपेणोत्पन्नत्वात् । अतो मां भृत्य इति भजस्व जानीहि । अत एव नैवाहमिति॥१२॥

**त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम्।**

**राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषम्॥१३॥**

**कै र्गुणैरनुरक्तासि मूढे पण्डितमानिनि।**
**यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम्॥१४॥**

**अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः।**

मानुषे भावस्त्यज्यतां, मनुष्य एव रक्षणीय इत्यभिप्रायस्त्यज्यतामित्यर्थः। किन्तु प्राचीनकृपया मूढे पण्डितमानिन्यपि राक्षसे भृत्ये मयि भावः प्रणीयताम् अयमपि रक्षणीय इत्यनुसन्धीयतामित्यर्थः । किञ्च राज्याच्च्युतं तुच्छीकृत्य राज्यभोगमित्यर्थः । कुतः? असिद्धार्थम् अश्चासौ सिद्धार्थश्च असिद्धार्थसितम् अवाप्तसमस्तकामं विष्णुमित्यर्थः । परिमितायुषं परि गतं त्यक्तं मितम् अल्पमायु र्येन तम् अपरिमितायुषमित्यर्थः । किञ्च कै र्गुणैः अनिर्वचनीयै र्गुणैः अनन्तकल्याणगुणैरित्यर्थः। युक्तमिति शेषः। अनुरक्तासि, कुत एवं दुर्मतिः दुष्टेष्वपि मतिः अनुग्राहिका यस्य सः अत एव हि स्त्रिया वचनात् सुहृज्जनं राज्यं विहाय वने वसति तादृशं त्वमनुरक्तासि यतः अतः सर्वोत्तमा लक्ष्मीस्त्वम् अत एव मां भृत्यत्वेन अङ्गीकुर्विति तात्पर्यम् ॥१३॥१४॥१५॥

**इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम्**
**अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः।**
**जग्राह रावणः सीतां बुधः खे रोहिणीमिव॥१६॥**

इतीति प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु – रावणः अन्यत्र सुदुष्टात्मा काममोहितश्च यद्यपि तथाप्यत्र न तथा अत एव बुधो रोहिणीमिव जग्राह।बुधः स्वमातरं यथा पूजार्थं गृह्णाति तथा रावणोपि सीतां जग्राह। स्वगृहे संस्थाप्य स्वेष्टदेवताबुद्ध्या पूजयितुमेवेत्यर्थः। “जग्राह रावणः सीतां बुधः खे रोहिणीमिवे”ति।

ननु अत्र नलकूबरवेदवत्यादिशापात् बलात् कथं परदारस्पर्श इति चेत्, सत्यं, रावणः सीतां साक्षान्न जग्राह न स्पृष्टवान् परन्तु जानुकेशादिच्छायामेव जग्राह। राक्षसानां छायाग्राहित्वात्। तदुक्तं स्कान्दे –

**"छायाग्राहित्वमप्यस्ति सर्वविद्याविशारदे"।**
**केशच्छायां परामृश्य जानुच्छायां तथैव च॥**

**गृहीत्वा जानकीं हृष्टो लङ्कां प्रायात्स रावणः**
**सीतापहरणं चैव ये शृण्वन्ति नरोत्तमाः।**
**न तेषामशुभं देवि भविष्यति कदाचन॥१६॥** इति

**वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः।**
**ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना॥१७॥**

वामेनेति। मूर्द्धजेषुकरेण मूर्द्धजाः श्रेष्ठा इषवः यस्मिन् तेन करेण दक्षिणेन वामेन च ऊर्वोः पादयोः परिजग्राह पादौ गृहीत्वा लङ्कां प्रति आगन्तव्यमिति प्रार्थितवानिति भावः॥१७॥

**ततस्तां परुषै र्वाक्यै र्भर्त्सयन्त्स महास्वनः।**
**अङ्केनादाय वैदेहीं रथमारोपयत्सदा॥२०॥**

तत इति स्पष्टोर्थः । वस्तुतस्तु– परुषै र्वाक्यै र्यदि मां भृत्यत्वेन नाङ्गीकरोषि तर्हि तवाग्रतः प्राणांस्त्यक्ष्यामीत्यादिवाक्यैः भर्त्सयन् भीतिमुत्पादयन् रथमारोपयत् ॥२०॥

**सा गृहीता विचुक्रोश रावणेन यशस्विनी ।**
**रामेति सीता दुःखार्ता रामं दूरगतं वने॥२१॥**

सा गृहीता इत्यादीनां वास्तवार्थे सीताया दैन्यवत्प्रतीयमानानि वाक्यानि सर्वाणि सीतया लौकिकरीतिमनुसृत्योक्तानीति द्रष्टव्यानि ॥२१॥

## ६. उपसंहारः

इत्थं कृत्स्नस्य श्रीमद्रामायणस्य तात्त्विकदृष्टिं वितन्वानाः इमे श्रीमहेश्वरतीर्थचरणाः तत्र तत्र स्वविद्वत्तया इतरैः स्कान्दादिपुराणप्रमाणैश्च विराधखररावणानां पारुष्यवचनानामपि वास्तवार्थप्रतिपादनं विधातुकामाः, यथाशक्ति शरणागतिशास्त्रस्य स्मरणात् पठनात् नित्यपारायणाभ्यासजनितबलाच्च तद्ग्रन्थशरणागतानां परमरामभक्तानां स्वचिदाकाशे फलितस्फुरितध्वनितपदार्थभावार्थानां, एवं ग्रन्थकर्तुः ग्रन्थनायकस्य सपरिवारस्य च मुख्याभिप्रायस्य अबाधकाः सन्तः एव वास्तवार्थकथनात् प्राक् "प्रातीतिकार्थः स्पष्टः"इत्यनूच्यैव वास्तवार्थप्रतिपादने प्रवृत्ताः इति तद्वाख्यानादेव वयं जानीमः । अपि च, श्रीसीतारामयोः निरवधिकपरमप्रेमवतां तयो र्निन्दा कर्णयोः अश्मसारतुल्या मनसः विदारिणी च भवेत् तथा स्वप्नेऽपि नेष्टा स्यात् अतः श्रीमद्रामायणे यद्यपि चरित्रदृष्ट्या निन्दा वास्तविकी, नो चेत् विराधखररावणानां वधे महद्दोषोपपत्तेः, तथापि तस्याः तत्वज्ञानात् भक्तानां हृदये स्वल्पापि शान्ति र्भूयादिति धिया, प्रायशः एतैस्तदेव वास्तवार्थकथनं प्रामुख्यतया अभाजि इत्यहं मन्ये अत्र अस्मद्गुरव एव शरणं प्रमाणं च। तथाहि—

**"स्पर्शं राक्षसभूपतेरघतमं वक्तुं प्रियायास्तव"**
**केचिद्वैष्णवसत्तमा रघुपते नैवं सहन्ते विभो ।**
**तस्मादेव हि जानकीं निशिचरःसार्धं गृहेणाहरत्**

**मायामेव जहार चेति सरसं सङ्कीर्तयन्त्येव ते॥**

**—रामकथामृतम्**

अनेन इदं ज्ञायते यत् अत्र तीर्थीयमपि निन्दास्पर्शादिकम् असहमानमेव मुख्यार्थविपरिणामे प्रावर्तत न तु दूषयितुमित्यलं शम्।

॥ विजेजीयास्तां श्रीसीतारामौ ॥